दन्तधावनः, पुं, (धावयत्यनेनेति। धावि+ल्युट्। दन्तानां धावनः।) खदिरद्रुमः। गुच्छकरञ्जः। इति राजनिर्घण्टः॥ वकुलः। इति शब्दचन्द्रिका॥

दन्तपत्रं, क्ली, (दन्ता इव पत्राणि यस्य।) कुन्दकुसुमम्। इति शब्दरत्नावली॥ (यथा कुमारे। ७। २३।
"कर्णावसक्तामलदन्तपत्रं
माता तदीयं मुखमुन्नमय्य॥")

दन्तपत्रकं, क्ली, (दन्त इव शुभ्रं पत्रं दलं यस्य। कप्।) कुन्दपुष्पम्। इति शब्दचन्द्रिका॥

दन्तपुष्पं, क्ली, (दन्त इव शुभ्रं पुष्पमस्य।) कतकफलम्। इति शब्दचन्द्रिका॥

दन्तफलं, क्ली, (दन्त इव शुभ्रं फलमस्य।) कतकम्। इति शब्दचन्द्रिका॥

दन्तफलः, पुं, (दन्त इव शुभ्रं फलमस्य।) कपित्थः। इति राजनिर्घण्टः॥

दन्तफला, स्त्री, (दन्तवत् शुभ्रं फलं यस्याः। टाप्।) पिप्पली। इति राजनिर्घण्टः॥

दन्तभागः, पुं, (दन्तसहितो भागः। शाकपार्थिवादिवत् समासः।) गजाग्रभागः। गजस्य मुखतः स्कन्धपर्य्यन्तो योऽग्रभागः स दन्तसहितः। इत्यमरभरतौ॥

दन्तमलं, क्ली, (दन्तलग्नं दन्तस्य वा मलम्।) दन्तलग्नक्लेदः। तत्पर्य्यायः। पुष्पिका २। इति हारावली। १६५॥

दन्तमूलिका, स्त्री, (दन्त इव शुभ्रं मूलमस्याः। कप्+टापि अत इत्वञ्च।) दन्तीद्रुमः। इति शब्दरत्नावली॥

दन्तरोगः, पुं, (दन्तस्य रोगः।) दन्तामयः। तन्निदानादि दन्तशब्दे द्रष्टव्यम्। तस्यौषधं यथा,
"काकजङ्घाशिफामूले मुखेन विधृते शिव!।
चर्व्विता दन्तरोगाणां विनाशो हि भवेद्ध्रुवम्॥"
दन्तरोगाणामित्यत्र दन्तकीटानामिति पुस्तकान्तरे पाठः॥ इति गारुडे १९६ अध्यायः॥ अपि च गारुडे १९८ अध्याये।
"शुष्कमूलकखण्डानां क्षारो हिङ्गुसनागरम्।
शतपुष्पी वचा कुष्ठं दारु शिग्रु रसाञ्जनम्॥
सौवर्च्चलं यवक्षारं सामुद्रं सैन्धवं तथा।
भूर्जग्रन्थि विडं मुस्तं मधु शुक्तं चतुर्गुणम्॥
मातुलुङ्गरसञ्चैव कदलीरसमेव च।
तैलमेभिर्विपक्तव्यं कर्णशूलापहं परम्।
वाधिर्य्यं कर्णनादञ्च पूयस्रावञ्च दारुणः।
पूरणादस्य तैलस्य क्रमयः कर्णयोः स्थिताः॥
क्षिप्रं विनाशमायान्ति शशाङ्कमौलिशेखर!।
क्षारतैलमिदं श्रेष्ठं मुखदन्तामयापहम्॥"
अन्यच्च।
"तैलं लाक्षारसं क्षीरं पृथक् प्रस्थमितं पचेत्।
द्रव्यैः पलमितैरेतैः क्वाथैश्चापि चतुर्गुणैः॥
लोध्रकट्फलमञ्जिष्ठापद्मकेशरपद्मकैः।
चन्दनोत्पलयष्ट्याह्वैस्तत्तैलं वदने धृतम्॥
दालनं दन्तचालञ्च दन्तमोक्षं कपालिकाम्।
शीतादं पूतिवक्त्रञ्च विरुचिं विरसास्यताम्॥
हन्यादाशु गदानेतान् कुर्य्याद्दन्तानपि स्थिरान्।
लाक्षादिकमिदं तैलं दन्तरोगेषु पूजितम्॥
इति लाक्षाद्यं तैलम्।
जयेद्विस्रावणैः खिन्नमचलं क्रिमिदन्तकम्।
तथा च पीतैर्व्वातघ्नैः स्नेहगण्डूषधारणैः॥
भद्रदार्व्वादिवर्षाभूलेपैः स्निग्धैश्च भोजनैः।
क्रिमिदन्तापहं कोष्णं हिङ्गुदन्तान्तरे स्थितम्॥
इङ्गुदीभूमिकदम्बीपत्राङ्कुलकण्टकारिकाक्वाथः।
गण्डूषस्तैलयुतः क्रिमिदन्तकवेदनाशमकः॥
नीली वायसजङ्घा कटुतुम्बीमूलमेकैकम्।
संचूर्ण्य दशनविधृतं दशनक्रिमिपातनं प्राहुः॥
स्नेहानां कवलाः कोष्णाः सर्पिषश्चैव तस्य च।
निर्यूहाश्चानिलघ्नानां दन्तहर्षप्रमर्दनाः॥
चैत्रतस्य सर्पिषः त्रिवृता पक्वस्य सर्पिषः कवल इत्यर्थः।
स्नैहिकोऽत्र हितो धूमो नस्यं स्नैहिकमेव च।
पेया रसयवाग्वश्च क्षीरसन्तानिकाघृतम्॥
शिरोवस्तिर्हितश्चापि क्रमो यश्चानिलापहः।
अत्र दन्तहर्षे।
अच्छिद्रदन्तमूलानि शर्करामुद्धरेद्भिषक्।
लाक्षाचूर्णैर्म्मधुयुतैस्ततस्तान् प्रतिसारयेत्॥
दन्तहर्षक्रियां चात्र कुर्य्यान्निरवशेषतः।
कपालिका कृच्छ्रतमा तत्राप्येषा क्रिया हिता॥
अत्र दन्तशर्करायाम्। एषा क्रिया दन्तहर्षक्रिया।
फलान्यम्लानि शीताम्बु रूक्षान्नं दन्तधावनम्।
तथातिकठिनं भक्ष्यं दन्तरोगी विवर्ज्जयेत्॥"
इति भावप्रकाशः॥

दन्तवस्त्रं, क्ली, (दन्तानां वस्त्रमिवाच्छादकत्वात्।) ओष्ठः। इति हेमचन्द्रः। ३। २४५॥

दन्तवासाः, [स्] पुं, (दन्तस्य वासो वस्त्रमिवावरकत्वात्।) ओष्ठः। इति त्रिकाण्डशेषः॥ (यथा, कुमारे। ५। ३४।
"अपि त्वदावर्ज्जितवारिसम्भृतं
प्रवालमासामनुबन्धि वीरुधाम्।
चिरोज्झितालक्तकपाटलेन ते
तुलां यदारोहति दन्तवाससा॥")

दन्तवीजकः, पुं, (दन्ता इव वीजानि यस्य। ततः स्वार्थे कन्।) दाडिमः। इति राजनिर्घण्टः॥

दन्तशटः, पुं, (दन्तेषु शट इव ग्लानिजनकत्वात्।) दन्तशठः। इत्यमरटीकायां मधुरानाथः॥

दन्तशठः, पुं, (दन्तेषु शठ इव ग्लानिकारकत्वात्।) जम्बीरः। कपित्थः। कर्म्मरङ्गकः। नागरङ्गकः। इति मेदिनी। ठे, १६॥ (यथा, सुश्रुते। १। ४६।
"ऐरावतं दन्तशठमम्लं शोणितपित्तकृत्॥")
अम्लः। इति हेमचन्द्रः। ६। २४॥

दन्तशठा, स्त्री, (दन्तेषु शठा।) चाङ्गेरी। इति मेदिनी। ठे, १६॥ (यथा, भावप्रकाशे।
"चाङ्गेरी चुक्रिका दन्तशठाम्बष्ठाम्ललोणिका॥")
क्षुद्राम्लिका। इति राजनिर्घण्टः॥

दन्तशर्करा, स्त्री, (दन्तस्य शर्करेव।) दन्तरोगविशेषः। कफवायुशोषितदन्तगतमलम्। पाथुरि इति भाषा॥ (तस्य लक्षणं यथाह माधवकरः।
"मलो दन्तगतो यस्तु कफमारुतशोषितः।
शर्करेव खरस्पर्शा सा ज्ञेया दन्तशर्करा॥"
यथा च सुश्रुते निदानस्थाने १६ अध्याये।
"शर्करेव स्थिरीभूतो मलो दन्तेषु यस्य वै।
सा दन्तानां गुणहरी तु विज्ञेया दन्तशर्करा॥")
तस्यौषधम् यथा,—
"गोरक्षकर्कटीमूलं पिष्टं वास्योदकेन च।
पीतं दिनत्रयेणैव नाशयेत् दन्तशर्कराम्॥"
इति गारुडे १६० अध्यायः॥

दन्तशाणः, पुं, (दन्तानां शाण इव। पिच्छलतानकत्वात्।) गिलूकर्षम्। इति त्रिकाण्डशेषः॥ मिसि इति भाषा॥

दन्तशिरा, स्त्री, (दन्तानां शिरा यत्र।) माड़ी। इति शब्दरत्नावली॥

दन्तशूलः, पुं, (दन्तस्य शूल इव। शूलवेधनवद्वेदनादायकत्वात्।) दशनवेदना। तस्यौषधम्॥ यथा,—
"त्रिफलानिम्बयष्ट्याह्वं कटुकारग्वधैः शृतम्।
पाययेन्मधुना मिश्रं दन्तशूलोपशान्तये॥"
इति गारुडे १७४ अध्यायः॥

दन्तहर्षः, पुं, (दन्तानां हर्षो यस्मात्।) दन्तरोगविशेषः। इति माधवकरः॥ (अस्य लक्षणं यथा, सुश्रुते निदानस्थाने १६ अध्याये।
"दशनाः शीतमुष्णञ्च सहन्ते स्पर्शनं न च।
यस्य तं दन्तहर्षन्तु व्याधिं विद्यात् समीरणात्॥"
दन्तस्थानिः। यथा,—
"यस्य वै स्नातमात्रस्य हृदयं शोषते भृशम्।
जायते दन्तहर्षश्च तं गतायुषमादिशेत्॥"
इति वायुपुराणम्॥)

दन्तहर्षकः, पुं, (दन्तान् हर्षयतीति। हृष+णिच्+ण्वुल्।) जम्बीरः। इति जटाधरः॥

दन्तहर्षणः, पुं, (दन्तान् हर्षयतीति। हृष+णिच्+ल्युः।) जम्बीरः। इति त्रिकाण्डशेषः॥

दन्ताघातः, पुं, (दन्तानाहन्तीति। आ+हन+अण्।) निम्बूकः। इति राजनिर्घण्टः॥ दशनाघातः। (यथा, गणेशध्याने।
"दन्ताघातविदारितारिरुधिरैः सिन्दूरशोभाकरम्॥")
रतिक्रीड़ायां तस्य स्थानानि दन्तशब्दे द्रष्टव्यानि॥

दन्तार्बुदं, क्ली, पुं, (दन्तस्य अर्ब्बुदमिव।) दन्तरोगभेदः। तत्पर्य्यायः। दन्तपुप्पुटम् २ दन्तशोफः ३ द्विजव्रणः ४। इति राजनिर्घण्टः॥

दन्तायुधः, पुं, (दन्त एव आयुधं यस्य।) शूकरः। इति त्रिकाण्डशेषः॥

दन्तालिका, स्त्री, (दन्तान् अलति पर्य्याप्नोतीति। अल+ण्वुल्। टापि अत इत्वम्।) वल्गा। इति त्रिकाण्डशेषः॥

दन्तावलः, पुं, (अतिशयितौ दन्तौ अस्य। दन्त+"दन्तशिखात् संज्ञायाम्।" ५।२।११३।